मादयो विजङ्कः विहारे चक्रुरित्यर्थः किंत विशिष्टः गुलेः ष्टहुपगुणेदीनादिभिर्विद्यादिभिर्वाने प
नायुक्ताकृताध्ययनाइत्यर्थः कीदृशोगृहभीष्महृद्यैः गृहभिरवनगाहनीयैः भीष्मैर्भयानकैः हृद्यै
र्मनोज्ञादिभिः द्वंद्वेसतिगृहभीष्महृद्यैरिति निरूपंतत्त्वयस्तवतियान्तुरूपैर्योग्यैर्वचनैर्विनीतायहावव
नैरितिलक्षणैरनीयाविनीताश्चेतिभिन्नमेवाप्यलिंगोविनीतस्मादपनीतेजितेन्द्रियवलनेनिभृते
चापि विनयग्राहिते पिचेति विष्वः कृपाकरणानदाश्रयास्तलद्युक्ताः सकहणाइत्यर्थः कलास्वका
मकलाभस्तुकुशलाः प्रमाणस्य शास्त्रस्यनायाः कोटावग्रेप्रवीणास्तत्परायणा प्रमाणेशास्त्रमर्यादा
शास्त्रेयन्ताप्रमात्स्थित्यमरः कोटिस्त्रीधनुषोऽग्रेत्रिसंख्यानेदप्रकर्षयोरिति विष्वः प्रवणःक्रमनि १५
नोर्व्योप्रह्वे नानत्ववत्सुः पाध्यइति विश्वः पठेतेकुमारायुधिष्ठिरादयः तत्रा विडुरेणअनुरूपैर्योगपवच
नैवाक्यैर्विनीताः शिक्षिताइतियावत तत्राप्युज्ञातन्त्रियजेप्रतीहारेच सारथ्यो भुजिष्यानतनयेतत्रा

निगृह्णेषु प्रजासु रजौ इति विग्रहः। गुरुभीष्महृद्ये इति तिवन विशेषणं गुणविशेषलं वा गुरु द्रोणाचार्यो भीष्मो गांगेयः
तेनो हृद्ये हृदयंगमैः प्रमोदजकैरिति यावत् कृपाखिनाः इति कृपः कृपाचार्यस्तदाख्यिनाः निशमाणकोटिः
कौरवाणां क्रीडाभूमिः तत्र प्रवणाः तत्स्यमन्यत् ग्रामाणामियत्तामर्यादा वा कोटायां धनुरग्रे ये सा सा प्रमाण
कोटिः धनुषः शिक्षाभूमिरिति॥ ११ नेत्रिग्धगम्भीरगिरः कुमारास्त्रैलोक्यतापप्रशमैकदक्षाः नवांबुवा
हा इव धार्तराष्ट्रान् द्वेजयंति स्म विपक्षभूतान्॥ १२ इति रामादयः कुमाराः स्त्रिग्धं विपक्षान् द्वेजयंति स्मन हि ग्रीष्मकु
ये इति स्म इति लुट् इ स्म इति भूते पि लट् नवांबुवाहाः इव इति यथा नवमेघा धार्तराष्ट्रान् मितचं चुवरमितं हंसान् उद्वेजयं
ति विपक्षान् इति नभ्यं विषनहि स्त्रिग्धेति स्त्रिग्धा मधुमरा गंभीरा चोषवंत्यो गिरो वाचो येषामिति तथा पक्षे
स्त्रिग्धाः श्रवणसुखदा गंभीरा व क्रूदेशव्यापिन्यो गिरः शब्दा येषामिति त्रैलोक्य स्य इति त्रैलोक्यस्य लोकत्रय
स्य तापानामहेगानां संतापानां वा प्रशमे निराकरणे दक्षाः कुशलाः धनादिदानाश्रय प्रशमनात् त्रिलोकस्य
भुवने जने इति शास्वतः पक्षे वेलपतने च णासेसर्व सहाययोरिति विग्रहः विशिष्टः पक्षो येषामिति विपक्षा
निति धार्तराष्ट्राः स्मितां चां गिर्हिंसकौरवयोरिति मेदिनीकरः भारतपक्षे ते कुमारा युधिष्ठिरादयो धार्तरा
ष्ट्र धृतराष्ट्रसुतान् विपक्षान् स्तेयोधनादीन् विपक्षान् महायशुक्तान् चिरमुद्वेजयंति स्म धनादिदानात् त्रैलोक्यताप
प्रशमने दक्षान् नवांबुवाहा इव जलमेचनेनेति तत्स्यमन्यत्॥ १२ गुरुकृपोपनतायुधविद्यायासमधिकं परिवृं
हिततेजसः पवनसंगतपावकसन्निभान् भान्स्पष्टतापरभोषणतां दधुः॥ गुरुकृपेति तत्पपत्ता रामादयः पुरे

रा॰ पं॰ २॰ पोषान्नृणां भीषणतां भयंकरत्वं दधुः दधतिस्म ३ हेतुविशेषणमाह पवनेन वायुना संगतो यो वह्निस्तत्सन्निभाल
नुल्यात्लघु दुस्सहा इत्यर्थः ऊनत्वमित्याह गुरूणां मध्यापकानां कृपया नपनेनयाऽयुधविद्या धनुर्वेदस्तया सम
२० धिकमत्यर्थं परिहीं हितेवविनेनेजोयेषां तेतथा इहेह ज्ञाविति धात्वनुसारात् पक्षेन्दपन्नुतायुधिष्ठिरादयः
गुरुद्रोणाचार्यः कृपः कृपाचार्यस्ताभ्यामपनीता युधविद्या येस्तैः शेषं समानं रसप्रसंगेरपराजितानां द्वि
जिह्ममार्गैर्नवशीकृतानां तीव्रप्रतापज्वलनेन तेषां भावं भयं शात्रुगणेन नमेने रमेति तेषां रामादीनां भावं
भयं भाविभयं शात्रुगणेन नमेने अत्र नमन्यतेस्म स्वीचकारेत्यर्थः कर्तृकर्मणोः कृतीति षष्ठी नर्कर्तृके भय
मित्यपि नत्र हेतुमाह तीव्रेति तीव्रोऽनभिभवीयः प्रतापस्स एव ज्वलनो वह्निस्तेन भावं भयमतिशौर्यं छा
लित्वादित्यर्थः तेषां प्रतापज्वलनहेतुना शात्रुगणेन भावं भयमनुमेन इति वा किंविशिष्टानां रसस्य शृंगा
रादेः प्रसंगेष्वपि अपराजितानामवशितानामित्यर्थः द्विजिह्वेति द्विजिह्वस्य सूचकस्य खलस्य मार्गैर्वञ्चनादि
भिरवशीकृतानां दुर्जनकर्मभिरनाकृष्टानामित्यर्थः पक्षे तेषां युधिष्ठिरादीनां शात्रुगणेन दुर्योध
नादिभिः भावं भयं भविष्यद्भयं अत्र नेमेने तेषां भयं न त्वकर्तृकामि[illegible]वा तीव्रप्रतापज्वलनेन तीव्रः प्रतापः प्र
भितापो यस्य तादृशो ज्वलनो वह्निः तेन लाक्षागृहज्वलनेनेत्यर्थः तथा रसस्य विषस्य प्रसंगे रपराजितानां
नोनमृतानामित्यर्थावत् द्विजिह्वेति द्विजिह्वमार्गैरपि कृतदंशादिनामार्गैरपि नवशीकृतानां नम्रा २॰
पादितानामित्यर्थः द्विजिह्वयुक्तैः मार्गैर्वा सृगारस्त्वौ विषे वीर्यैति कान्तादौ इव रागयोः ... प्रभेदे चतथापा

रदे ˘˘˘ रमरइति विश्वः द्विजिह्वस्तु खले सर्पे इति मेदिनीकरः केचित्तु मौग्ध्यतापज्वलनेन लाक्षागृहवर्तिना वृकि
नाऽतेषां युधिष्ठिरादीनां भाविभयमनुमेनेपरस्परं स्वीचक्रे लाक्षागृहानलीनामेषां मारणं विधीयतामिति य
एमर्षं च कारेत्यर्थः अतः एव नसप्रसंगेरित्यादिहेतुगर्भं विशेषणद्वयं एवं कालेयातिभग्नारिरक्षो दीव्य
त्रेतिराधितेगाधिजन्मा भेमद्वेषी भूमिपालेययाचे दायादस्य प्रेषणं धर्मयोनेः एवमिति पूर्वोक्तप्रकारे
ण कालेगच्छतिसति गाधिजन्मा विश्वामित्रः भूमिपालेराजानं दशरथं दायादस्य सुतस्य प्रेषणं प्रस्थाप
नेययाचे याचते स्म दुहियाचेति द्विकर्मकत्वं दायं विभाज्यधनमादत्ते इति दायदः सुतः दायादौ सुतबां
धवावित्यमरः धर्मयोनेः धर्मस्योत्पत्तेः कारणभूतस्य स्त्रीपुंसयोश्च योनिस्त्रियामाकेरस्मरमंदिरइति विश्वः
धर्मयोनेरिति नोहेतुपंचम्यं नेवा तथा चगीतायां यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थान
मधर्मस्य तदात्मानं सृजाम्यहं गाधिजन्मा किंभूतः भीमस्य भयंकरस्य द्वेषी किकर्तुं ययाचे रक्षः राक्ष
सेयत्ता विघ्नोत्पादकं बाधितं जातित्वमिति जातावेकवचनं रक्षः किंविशिष्टं भग्नारि भग्नः अरिः शत्रु
येनतत् भग्नारि अन्यस्तु किंविशिष्टं दीव्यत्तेजः दीव्यतः सोत्साहे चोतो हृदये यस्य पक्षे भीमद्वेषी दु
र्योधनः भूपाले धृतराष्ट्रे धर्मयोनेः युधिष्ठिरस्य दायादस्य ज्ञातेः प्रेषणं प्रस्थापनेवनायप्रेषणं ययाचे
स किंविशिष्टः भग्नाविदारिता अरिरक्षा शत्रुरक्षणं येन स अन्यस्तु किंशिष्टः दीव्यच्चेतोबाधितुं गा
धिजन्मा दीव्यतः सोत्साहे परुषं चततः चेतः दीव्यच्चेतः बाधितुं पीलमस्य देव्यच्चेतो बाधीना स्त्रीत्वे

रा॰
पा॰
२१
21

णातिः नास्य शोकस्य लेशः महान् व्याधिः मनःपीडा नसमजन्म यस्मिन् पुत्रस्याधिर्मानसी व्यथेत्यमरः धर्मा
त्मानं प्रेषयामास विश्वामित्रप्रीत्या सानुजं भूमिपालः तद्वाक्येनेदत्तकर्णेनमोदः पुत्रप्रीत्या जानकृ
च्छ्रः कुमारम् धर्मात्मानमिति भूमिपालो दशरथः कुमारं रामं विश्वामित्रस्य प्रीतये सानुजं सलक्ष्म
णं वनं प्रस्थापयामास किंविशिष्ट धर्मात्मा नेधर्मप्रसवेस किंभूतः तस्य मुनेः वाक्येन वाक्यावसा
नेदत्तकर्णः श्रवणविषयेनमोदः वाद्यादिना नानुमोदितेनयस्य यद्वा दत्तकर्णेयाद्विश्वामित्रस्य
ति अनुमोदो हर्ष इति वा राजवचनात् तस्य कर्णेनानुमोद इति भावः पक्षे भूपालो धृतराष्ट्रः धर्मात्मानं
धर्मपुत्रं कुमारं युधिष्ठिरं सानुजं वनं प्रेषयामास किमर्थं विश्वामित्रेति विश्वेषाममित्रो दुर्योधनः
तस्य प्रीतये प्रमार्थं देवनात् संप्रेषणं क्रियतामिति दुर्योधनवाक्येनेदत्तकर्णेनमोदः स्वीकारो य
स्य सनथा पुत्रप्रीत्या युधिष्ठिरप्रीत्या जानकृच्छ्रः जातकष्टः यद्वा पुत्रप्रीत्या पुत्रस्य दुर्योधनस्य प्रेम्णा क
रतेन युधिष्ठिरत्यागेन जातकृच्छ्रः वाजपेयस्य यूपः इतिवत् यस्य संबंधे षष्ठी पुत्रप्रीत्या धर्मात्मानं प्रेष
यामासेति वा योज्यं अजानकृच्छ्र इति प्रकारप्रश्लेषाद्वा तत्र पुत्राणां दुर्योधनादीनां प्रेम्णा आनकष्टो हृ
दयेन तस्य कष्ट एवेति भावः मात्रा समेता सावरजः सरामः प्रस्थापितो धामस्तपोधननाम् स्थानान्तरे वि
ष्ठितो रणे समर्थकोदंडधरः प्रतस्थे मात्रेति सरामः स्थानान्तरे अयोध्यायाः देशान्तरे प्रतस्थे प्रस्थितः
विश्वामित्रतपोवने प्रति जगामेत्यर्थः किंविशिष्टो मात्रा समं रामजनन्या कौसल्यया सह राजा दश

रथेन तपोधनानां तपस्विनां धाम गृहं प्रस्थापितः कौसल्यासहितेन दशरथेन वने प्रस्थापित इत्यर्थः साध
साधुसमानेषु समे स्यादभिधेयवदिति विश्वः तथा सावरजा सकनिकोटोलक्ष्मणसहितः विहितवान् अभि
निघातनं गुणारणे सुसमर्थं कोदण्डधरः समर्थस्तत्र यत्नर्धरः समर्थो वायः कोदण्डं हस्ते धारयतीति पक्षे
युधिष्ठिरः स्थानेनान्तरे देशान्तरे प्रवसथे माता समेत्य कुन्त्या सह सावरजो भीमादिसहितः राज्ञा धृतराष्ट्रेण
प्रस्थाप्यमाने परकल्पितकामदे हृदा हृदं विषयं प्राप्य स वारणावते सः प्रविशोकमुवास तत्र भास्वद्युति
ना लाक्षाभवने प्रदोषकृत्स्नः परीति स रामः तत्र स्थानान्तरे प्रविशोके शोकाभावे यथा भवति तथा उवास उ
षितवान् प्रदोषेण सविमुखेन हृद्यः संध्याकालस्य हृद्यत्वादिति तत्र स्थानान्तरे किं विशिष्टे भास्वदिति
भास्वतः आदित्यस्य दीप्त्या लाक्षाभं लाक्षासदृशं लोहितं वने यत्र यद्वा मदनाख्यमाधवत्यौ मासे वनद
वस्थितेः सदापल्लवत्वाल्लोहिते तत्र वनलाक्षाभवनं यस्मिन् शेलिरागेणावनेसरः तिरागे वने सकुवस्त्राभाकरः वा
शाब्द्यार्थे भिन्नक्रमः विषयं वा विषये च प्राप्येति किंभूतं परमन्यथं कल्पितो जननीतोषाछिवेन का
मस्यकंदर्पस्य देहदाहो यत्र तथा विधे विभयजनकस्थाने निःशोकमुवासीति शोकातिशयप्रकटनाय का
मदेवदाहकेनाग्निवालाक्षाभवनं यस्मिन् पक्षे युधिष्ठिरो वारणावतो नगरप्रदेशास्तेन सङ्गवर्तते य
ते स वारणावते विषये देशे प्राप्यावशोके निर्भयं यथा स्यात्तथा तत्रवासेति भास्वतो दीप्ताग्नियत्र एवं भूते
लाक्षाभवने लाक्षानिमितगृहे ज्वलिते लाक्षागृह इत्यर्थः प्रदोषैः प्रकृष्टदोषैर्वा वीडकैर्वा प्ररोचनादिभिर्दु

रा॰
पा॰
२२
22

यौधनेस्तैवकौरवेन्द्रः परेणशत्रुणाकल्पितग्राकोहितः कामेनइच्छयादेहदाहायेत्रेतिदोषः स्यात्दूषणे
पापेदोषात्रात्रो भुञ्जेपिबेचेतिविश्वः परेणशत्रुणाकल्पितः समर्पितःकाममन्यर्थेदेहदाहायेत्रेतिवा यथाशि
वेनकर्दर्पदेहदाहः कल्पितस्तथायमपीति नयननजनकल्पश्लाघ्यमार्गचतस्मिन्विदुरवचनमात्रा
प्रभावेनस्मृएवन् अनयदपिकियेतेकालमालोच्यकार्यप्रकटितगुरुभक्तिःसानुजोराजसूनुः नयननेति
सानुजः सलक्ष्मणोराजसूनुः रामः नत्वाननेगतपोवेनकियेतमपिकालमनयदतिवाहितवान् कार्यं गुरो
रात्तापरिपालनरूपमालोच्य विमृश्यनरेन्द्रपाधेनेत्यर्थः देवताकार्यराक्षसवधरूपंवा किंविशिष्टनयन
तेनानुगतेनजननेकल्पश्लाघनिर्मितःश्लाघनीयोमार्गोवर्त्मयत्र विदुरेति विदुरस्यसानुनोगरस्यविश्वा
मित्रस्यवावचनमात्रप्रभावेनस्मृएवन् आकलयन् ग्रारात्दूरसमीपयोरित्यमरः पदेत पद्विराजसूनुःयुधि
ष्ठिरःसावरजःसभीमः भाविकार्यवैरादिरूपमालोच्य कियेतमपिकालेतत्रालोक्य नत्वलाक्षागृहे
नयननेनेनविनेतेनभीमस्त्रिग्येनजनेन ------ भूमेरधस्तान्मार्गनिर्गमनमार्गोयत्र आप्तस्यवैधोरा
स्पस्तस्यविदुरस्यकौरवमंत्रिणोवचर्णस्मृएवन् अनएवप्रकटिताशुरुभक्तिर्येनसतथानिर्गममार्गोपि
विदुरेणानैस्यैवोपदिष्टइतिस्फूर्तिः विदुरेणनागरेधीरेकौरवाणांचमंत्रिणि इतिमेदिनीकरः स्वयमेधि
तचित्रभानुदहेतिस्फुरितोनोवसतिंविहायभूयः सवनोनरमुचतात्रिभीमः स्वपुरंभूतधुरंधरःप्र
पेदे स्वयमिति सत्रामोवनोतरेपदेप्रपन्नः नतोन्यत्रजगामेत्यर्थः नोवसतिंविहायत्यक्त्वाइतिकिं

भूतानेंस्फुरितोशोभाशुक्तां किंभूतः पथिता समुत्थिता छिन्ना नानाविधाहेतयो यासां ताः हशाहेतयो यस्त्वालिप
स्यसनथाएपितचित्तभात्रुहेतिः स्वर्परे विसर्जनीयस्य लोपो वक्तव्य इति विसर्जनीयलोपः तथानथतः सेश
मायोधनायेश्रयः शत्रवस्तेषां भीमो भयंकरः सेगुर्वोमातनमो भूतगुरः श्रवतारत्रूपायाधारकोवोहति प
द्वे सगुयिष्ठिरः स्वयमात्मनैव एपितो वा यिनस्त्रिन्नभावं वक्रिलस्य हेति ज्वालानघास्फुरितोदह्यमानोनामि
तिलाद्वागहत्रूपांवसति विड्डरोपदेशाद्धिह्यायवनानरं श्रपेदेश तिशेषेसमाने विलेच्छगेगोव्रजनः सहरमेला
नेदेहस्य बलानुभावात् तस्याग्रतः स्वेदरोनोज्ज्वलांगी निशाचरी प्रादुरभूत् मदोथा विलेखेति तस्य रामस्या
ग्रतो निशाचरी नाटकाभिधानाद्राक्षसी प्रादुरभूत् प्रकाशं गता प्रकाशप्रादुर्भावि स्पादित्यमरः विशिष्टा मदो
धेति मदेन मत्तेत या गर्वेण वा स्वेधा विवेकशून्या दर्पोधेत्यर्थः तथा स्वेदेदानवविशेषविशेषात्समिति रता श्रेष्ठ रक्ता
स्वेदरता तज्ज्वलांगी ज्वलनीति ज्वलः ज्वाला तज्ज्वला तद्र्ध्व गता ज्वाला यत्र ईदृश अंगं यस्याः सा स्वेदेन ज्वाला
ऽवेनीत्यर्थः वलायाः विश्वामित्रदत्तायाविद्यायाः प्रभावात् श्रेलानदेहस्य श्रेलानशरीरस्य गेगावि
लेच्छनीत्वात्सहृदयमति हृदे शान्तरे व्रजतः भारतपक्षे तस्य युधिष्ठिरस्य बलानुभावात् बलस्य प्राकेर नुभावा
त् श्रेलानदेहस्य हिडिंबा नाम निशाचरी मेधाकामात्मत्रा कामुकी तथा स्वेदरसभावः स्वेदरतातया
तज्ज्वलांगी रम्यांगी तल्पमन्यत् मदोद्रेकसिकं भूयो गर्वेहर्ष मदानयोरिति मेदिनीकरः श्रेष्ठं तनिमिरेलसी
वेवद्गीनैत्रनाउति स्वेवगचलितो स्खलत्तवगमृगा हिडिंबावली निरंतरतरोदरीकृतनकदद्विलसा

रा· पा· २३

23

हतानन्तविरीहस्तरूपनंदनेश्वरकौशिके कानने दष्टान्तरस्थपागमत् किमपि कामचारोद्धुरं स्ववेगेन सातात्का
निशाचरी किमपि निर्वचनीयं दृष्टान्तरमवस्थान्तरमसौ मम्तूपत्वमुपागमत् उपागता हताननिमेषाद्धान्तत्र
कानने नन्दपनंदने रामे निरीहस्य हृष्टेति किंभूते कानने ब्रुवरः सशस्त्रो महास्वनवान् कौशिकः विश्वामि
त्रो यत्र दृष्टान्तरं किंभूतं कामचारेण स्वेच्छया कारणेनोद्धुरं स्वेच्छया जनितं सा किंभूता स्ववेगेन चलिता
स्ववलाग्रतएवोच्छलंती मेलेगाः पक्षिणो मृगाश्चारण्याः पशवः श्वापदाः सर्पाः तेषां या डिंवावली का
लवेडावलीतया निरंतरं नरमन्यथं वाश्रगुदरं यस्याः सा तथा यद्वा स्ववेगचलिताः तच्छलन्तवगमृगाह
योयया सा ताहृशी च डिंवावली निरंतरतरोदरी चेति द्वंद्वसमासे द्रूपं स्ववेगचलितोच्छलन्तवगमृगाहयो
यत्र एवंभूतया डिंवावल्या निरंतरमुदरं यस्याः श्लिवा डिंवोभययध्नावलीभ् - - - - - - - - - निसवश्निमे
दिनीकरः तथा हूतकेकपटेद्दक्षिणाद्दाय द्वाकूनकः हन्तिमोद्दक्षिणः सरलो - - - - वायसाः
सा तथा द्दक्षिणः सरलो वामः परच्छिद्रान्वेषी विशुपादः - - - - - - यांच्यदानप्रतिष्ठेपारिति विष्वः
कौशिको पि नलेखालया हेरंगमुलशकयोः कौशालोलूकयोश्चस्याद्धिश्वामित्रमुनावपीति मेदिनीके
रः पद्ये साहि डिंवारोहसीन्नपस्तुते भीमेनिरीहस्य किमप्यनिर्वाच्यं दृष्टान्तरं मनसम्पसंचारेणाद्वृष्टमव ।
स्थांतरमुपागतानहृश्रीनेनमनस्यविकारवतीव भूवेनार्थः मुखरोनयेसमशाहः कौशिकः उलूकोयत्र
ताहशेवने कथंभूता स्ववेगेन चलितनश्रतएवोच्छलत्त खगामृगाश्च यस्याः सा स्ववेगचलितोच्छलन्तव

गम्भगानव्यावलीभिः निरंतरमनवकाशंतलेयत्रतान्हृ शाखदं यस्मास्मात्घेतिरलयोरैक्यात् दशावस्थादीप
वर्तिर्वस्तोतेभं निषेधाषितिः इतिमदिन्नीकरः तलेस्तद्रूपे --- सोल्कौवेन्माचानवारोणइति विषमेषुप्रहरणैर्नोकृ
त्वातोपनतोऽद्भुतेसहि हिडिंबस्यशाकलैरपुलाम्पिशिताशिनः विषमेति सरामः पतनः पक्षिणः पतन्यनेनत्रि
पतनेत्यमरः पिशिताशिनः मांसादान् हिडिंबस्यकालखेडसशाकलेः तेहूरथ्यानाटकयाः अपुलात् हिः
पादप्रहारेणाद्भुतेश्रीचैतनाटको विषमस्यानिशितस्यइषोः बाणस्यप्रहारेणाश्रान्तोपीडितोकृत्वा संपाद्यकृतौ
छेदने सुलोसुक्लेशानाशेदिशतीत्यादिवर्तकारस्मादिहिविषये श्लेषेनदोषः तस्मातरस्सुलंबाणेनति
श्रितेनसंपादित्यर्थः पक्षे सभीमः ग्रापततः ग्रामाकृतः हिडिंबस्यातदृश्यविशेषस्यशाकलेदेहखेडैः पि
शिताशिनोगण्डादीन्पक्षिणः अपुलान् नोहिडिंबो विषमेषुः पंचबाणः कामःतस्यप्रहारेणार्तोकृत्वाविधा
यस्थकेयेनदर्शनेन स्मरबाणखिन्नोकृत्वेत्यर्थः प्रतीपदर्शिनी सैषाविचचारास्यपर्यन्यपि ततोगुरुगिरानस्या
जीविते प्रेणवभूवसः पतोहेतुरस्याग्रस्यपथिमार्गे सैषाताटकाप्रतीपदर्शिनी विपरीताचरणानिकामेदे
षिणी वचचारवभ्रम ततोहेतोः गुरुगिराविश्वामित्रवचनेन तस्याताटकायाजीवितेशः यमः सरामोबभू
व पक्षे अस्यभीमस्य सैषाहिडिंबापथिमार्गे प्रतीपदर्शिनी वनिता विचचार संजाताततोः हेतोः गुरुगिरा गुरो
ज्येष्ठभ्रातृयुधिष्ठिरस्य वचनेन तस्याहिडिंबाया जीविते शास्वामी वभूव प्रतीपदर्शिनी वामा वनिता महिला
नचेत्यमरः जीवितेशो यमेषु सितिषुस्या जीवितेश्वरे इति विश्वः वचनमात्रगुरोरगुनिहन्तानस्य सुतेनसमेत्य

रा० पा० २४ निशाचरी अनुपतन्ती शितान्ताशिखरोर्कचासमयशुक्रमपायमवापसा वचनमिति सा निशाचरी ताटका समु
येशुक्रं प्राणमयायेमरणमवापमनवती किं कृत्वा नृपसुतेन रामेण संगत्य मार्गे मिलित्वेति किं विशिष्टेन मु
नमुनेः विश्वामित्रस्य वचनं कुर्वता सा किं विशिष्टा अनुपश्चात् पतन्ती पिशिताशिचटा पिशिताशिनां अट्टा
टीनां च टासमोहोयत्र ताद्दशी नर्कचा नडनकेशा च अनुपतन्ति शिताशिखरोत्कचाभिवायदडयमेनदि
ति पद्धे सा निशाचरी हि विवासमयशुक्रं व्यवस्था समयिसहितमपायं विश्लेषमवापसरणसमयेसमा
गमिच्छामि इति व्यवस्था समयः प्रात्मगुरोर्युधिष्ठिरस्य वचनमनुतिष्ठता नृपसुतेन भीमेन समेन्य त्वामिभा
वेन समागममेत्य अनुपश्चात् भीमसमागमात् अनुपतन् वह्निर्भवन् उद्दामाद्रिस्पर्धी पिशिताशी मांसभक्षको
राक्षसोत्कटोत्कचो नाम पुत्रो यस्याः सा महामुनेः प्राप्तवनस्य तपोवने नरेन्द्रसूनोः धर्मजन्मनः सद्भावन
भूमिपराशरोद्भवप्रसादलाभेन बभूव निर्वृतिः महामुनेरिति नरेन्द्रसूनोः रामस्य पराक्रमेण निर्वृतिः ला
भ्यं बभूवेति कृतनमस्या हृष्टा राक्षसा णाउद्भयः तत्रैव त्रिविधस्य एवंभूतस्य प्रसादस्य लाभात् अर्थार्थिनिभिः कृत
स्य शिरोमणिताटकाद्यापदिनाम्नैयोधनानां भयहानिर्जातेति स तेषां तस्य सादोजात इति धर्मजन्मनो धर्मे
त्वान्निष्ठानस्य महामुनेः कौशिकस्य तपोवने प्राप्तवतः पद्धे नरेन्द्रसूनो राजपुत्रस्य धर्मजन्मनो युधिष्ठिरस्य
पराशरोद्भवप्रसादलाभेन पराशरात् मुनेरुद्भवो यस्य स व्यासः तस्य यः प्रसादः इंद्राराधनाय उपदेशः कुर्वि
त्येवंरूपः तल्लाभेन महामुनेः शालिहोत्रस्य तपोवने प्राप्तवत इति निर्वृतिः स्थिता वक्ष्य समानेच मुखेविशिया

24

मितिग्रन्थसमाने तेनैवैकेन गृहणामनिर्दृष्टत्वश्रेयोजनः एकचक्राहितनगतिर्भास्वानिवतदावभौ तेनैवेति
सयामस्तदावभौ शुशुभे किंभूतस्तेनैव एकेनाद्वितीयेन गृहणा किंभूतामित्रेण विहितेन संपन्नश्रेयोजनेयस्य
सतथा एकचक्रे ब्रह्मराज्ये आहितनागति येन सतथा करवभास्वानिवेति भास्वानपि एकचक्रेण एकरथ
गेण आहितनगतिरिति पक्षे सयुधिष्ठिरः गृहणावासेन एकचक्रेणनगरे त्रिविशेष्वेण आहितनागतिर्येनेति
चक्रः कोकः पुमांस्तीवेवत्रिसैन्यरथांगयोः राष्ट्रदेशांतरे ऊंभकारोपकरणस्त्रियामिति विश्वः तस्मिन्न
देशे अन्त्यपस्तु संगान्मनाथभावे सहसाप्रपन्ने कृतक्रियासमाधियोग्य नीनोरक्षोनिमित्तं भयमहद्दीपे तस्मि
न्निति तस्मिन्नदेशे कोशिकवनेन्तःपरस्तु रामस्य संगात्मनाथभावे सरत्नेकत्वेश्रपन्नेगतेमतिश्रुनीनां नत्रयो
वनवासिनोरक्षोनिमित्तेरात्रस्य जनितेभयमहद्दीपे तदाश्रम नेषां कविशिष्टानोकृत क्रियासत्यक्रिया
सस्तक्राधीतु धियेषां तथा सहसाहृद्वाद नकिं न मित्यर्थः पक्षे तस्मिन्देशे शालिहोत्र तपोवने रक्षोवकना
माद्येतः तन्निमित्तेन तत्समेन्त्यपस्तनवः युधिष्ठिरः स्वयः ग्रन्थसमाने निमित्ते हेत्वलक्षणे रितिमेदिनीकरः
रक्षो हितंद्विजायसहहिमाज्ञाभिनोदितः मनतानंदेनोयत्नमानस्यो न्तपनेदनः रक्षइति त्पनेदनो माम:
यत्नमानस्यो रक्षोवधायसावधानोबभूवेत्यर्थः कथंभूतः सहतोदेवः नोमानंदनः आनंदजनकः आनंद
यतीत्यानंदः तथा किं विशिष्टः रक्षसा सहिताः रक्षोहिता द्विजातेरायसताः तदभिशुक्षेविशिष्टायाहृष्टय
स्तर्मात्रेणाभिनोदितः प्रेरितः हृष्टसंतयारक्षसोवधायतेनियुक्तइति रक्षोसिस्महितानियेषांतेरक्षो।

रा० पा० २५

हित्वाऽऽस्तिवा ग्रायत्तत्तेजिनेहिङ्क्षिशिनेऊपितेपिवेनिमेदिनीकरः पद्दे मरुहाग्रः नस्तानेरनोमहद्दा
नेदत्रःस्पस्तनोभीमोयत्तमानेस्याऽइति किंविशिष्टः माग्राजनन्याऊनन्याग्रभिनोदितःप्रेरितःत्वंवकेदस्य
जहीतिकथं रक्षोहित्वहिजायत्तत्त्वहृष्टिरक्षोहिनद्विजेगायत्ताहह्रियंत्रेतिक्रियाविशेषणं मारीचेष्टम
मनिष्टकारिणमसोसिद्धाश्रमस्यायिनोविप्राणामभयार्थमध्वरविधिंगोगुरोराज्ञया सद्यःसानुचरेनि
शाचरपतिंभीमस्तुबाहुंरणेदोर्वीर्येणजघानवीरपदवीमारुह्यचोरांवके मारीचेति श्रेसोरामः स्तुबाहुस्तु
बाहुनामानंनिशाचरपतिंराक्षसश्रेष्ठंजघानहतवान् भीमोभयानकः गुरोःकौशिकस्याज्ञयाध्वर
विधेर्यत्तक्रियायागोरक्षकःस्तुबाहुं किंभूतंमारीचस्यतज्ञातराक्षसश्रेष्ठं प्रियमारीचेष्टंतथासानुच
रंस्तसैन्यं रणेसंग्रामे ग्रनिष्टकारिणमर्थान्मनोनोद्विषामिति दोर्वीर्येणबाहुबलेनवीरपदवींवीरमार्गं
मारुह्य चोरांवके श्रेवैवग्रेवकामानाताटकानिशाचरी चोराग्रेवकायस्यताहृशं चोरेभयंकरेग्रेवके
नेत्रेयस्यतिवा किमर्थमित्याहसिद्धाश्रमेतस्मिंस्तपोवनेस्थायिनामवस्थितानांविप्राणामभयार्थमि
ति पद्दे श्रेसोभीमःनिशाचरपतिंवकंवकनामानंजगान किंभूतंस्तुबाहुंशोभनभुजं चोरांकादिनो
वीरस्यपदवीमारुह्यगुरोर्बुधिष्ठिरस्याज्ञया कथंभूतंवकंमारीचेष्टं मारीजमद्यसनचवेष्टायस्यत
मिति मारीचस्यजनहृदयऽइतिमेदिनीकारः भूचरद्विजगणाशिनेद्विषंविचरद्विजगणाशनंनदा
नेविधायऊलमग्राजन्मनोराक्षसहृदयकरोररक्षसः भूचेरेति सरामःअग्रजन्मनोविप्राणांऊलेस २५

स्वः हेरम्बसौराज्यसत्त्वं करोतीति राज्यसत्त्वकरः ते हि विषमबाणांके खेचरद्विजगणाशने खेचरंतीति खे
चराः आकाशचारिणो द्विजः पक्षिणो गृध्रादयस्तेषामशने भोजनीये कृत्वा ते कबंधभूते भूचरेति भुवि
चरंतीति भूचराः ये हि द्विजा विप्रास्तानशितेभ द्विजेनशीले यस्मैवंविधं पक्षे सभीमः द्विषंवके ऊर्ध्वेजनप
देगे ह सजाने यगणे पिचेति विप्रः दनुविप्राण्यजाद्विजात्स्वमरः भूचरद्विजगणाः अशने भोजने य
स्येति भूचरद्विजगणाशनः ताहृशो वा द्विजराजगवीभिरस्य वर्धितश्रीरिन्द्रपात्मजः जगदानंदयन्मा
दृशः कामदेवस्त्वावभौ द्विजराजेति सन्त्यपात्मजो रामः कामदेवः कंदर्पस्त्ववभौ शुशुभे कथंभूतः
द्विजराजो ब्राह्मणश्रेष्ठः तस्य गवीभिः वाणीभिराशीर्वचनरूपाभिः वर्धिता श्रीः लक्ष्मीर्यस्य तथा
जगत् त्रिभुवनमानंदयन् ते हि तकेष्टकत्वात् कंदर्पोपि द्विजराजस्य चंद्रस्य गवीभिः किरणैर्वर्धि
तश्रीः विद्दितोद्रेकः जगत त्रैलोक्यमानंदयन्नपि भवति यद्वा एतत्काव्यकारयिता नृपः कामदे
वनामा तद्वद्भासे सोपि ब्राह्मणाशीर्वादैः संभृतश्रीः द्विजराजगवीभिरत्र गोशब्दः स्त्रिलुकीति
समासांतः गवीशब्दोपीति केचित् पक्षे सन्त्यपात्मजो भीमसेनो द्विजराजगवीभिः शालिहोत्रतपो
वनवासिब्राह्मणाशीर्वादैः संभृतश्रीः शत्रोर्बकदैत्यस्य विनाशनादित्यर्थः शत्रुः पशुभूमेषु वाणयोः
निशेषसमाने एतत्स्वकाव्यं काव्यकारयितुर्नृपस्य कामदेवनाम्नो नामांकमिति सर्गांते कामदेवस्त्वा
वभाविति कामदेवांके काव्ये ज्ञेयम् इति श्री हलधरणीप्रसनकादेवकुलतिलकचक्रवर्तिकामदे

रा॰
पा॰
२९

वंशोत्साहितकविराजपण्डितविरचिते राघवपाण्डवीये कामदेवाङ्के महाकाव्ये श्रीरामयुधिष्ठिरव
र्णनो नाम प्रथमः सर्गः ॥ समस्तप्रक्रियाविराजमानत्रिपुरराजविजयिश्रीमन्नारायणपरायणराजाधि
राजश्रीमदमरसिंहकारिते श्रीशशिधरकृते राघवपाण्डवीयप्रकाशे प्रथमः सर्गः ॥ नृपेण कन्या
जनकेन दित्सितामयोनिजां लेखयितुं स्वयंवरे द्विजप्रवर्येण स धर्मनन्दनः सहानुजस्तां भुवमप्यनी
यत नृपेणेति द्विजप्रवर्येण ब्राह्मणश्रेष्ठेन कौशिकेन स धर्मनन्दनः धर्मं नन्दयति वा धर्मप्रधानत्वादि
त्यर्थः भामपि भुवं भूमिं जनकराजधानीं मिथिलामनीयत नीतः किंभूतः सहानुजः सलक्ष्मणः
किमर्थमित्याह कन्यामिति नयोनिजां तां अयोनिजां तां स्वयमुत्पन्नां कन्यां लेखयितुं प्रापयितुं किंभू
तां जनकेन जनकाख्येन नृपेण दित्सितां परस्मै दातुमिष्टां स्वयंवरेण विशेषः सीतया सह विवाहनि
मित्तं रामलक्ष्मणैर्नीत इत्यर्थः पक्षे द्विजप्रवर्येण ब्राह्मणश्रेष्ठेन शालिहोत्रेण पावनवासिना सोपि धर्म
नन्दनो युधिष्ठिरः अपि भिन्नक्रमे तां भुवं द्रुपदनगरीमनीयत नृपेण द्रुपदेन जनकेन पित्रा द्रोपद्याः
दित्सितां दातुमिष्टां अयोनिजां यज्ञकुण्डोत्पन्नां कन्यां द्रोपदीं लेखयितुं सानुजो भीमादिभ्रातृस
हितः ॥ १ ॥ मार्गेष्वथादीर्घतमस्स्तनस्य कलत्रकक्षप्रतिमोक्षणेन शृङ्गारवान्यस्य जितात्मनोपि च २९
कार तोषं नरदेवजन्मा मार्गेष्विति नरदेवो राजा तस्माज्जन्म यस्य स नरदेवजन्मा भरतस्तु नत्वा रामः दी
र्घतमस्तनस्य गोतमस्य प्रीतिं चकार कृतवान् उनतः अस्मात् मार्गेषु निवर्त्मनीत्यर्थः कलत्रस्येति ।

कलत्रस्य तत्पत्न्या अहल्यायाः कृते कुत्सकष्टस्य शिलामयत्वस्य प्रतिमोहनेन तत्त्यागेन विशिष्टस्य जिना॥
त्मनोयत्नविन्नस्य श्रृंगारवर्णनस्य प्रतिनीजस्यत्वात् ज्वालिनो गारसहशास्य प्रयोनेनरार्थे जिनेंद्रियेणाविति
पाहे नरेनत्र प्रसोरामस्यत्यस्य विशेषणं पुरा किल गौतमपत्नी अहल्या शक्रेण संगता ततस्तेन गौतमेन पाषा
णमयी भवेति शप्ता रामावतारस्य विस्तीर्णचरणरेणुना स्ववपुः प्राप्स्यसीति शापोत्तमुक्तवान् इति पुराणोक्तिः
पदे नरदेवजन्मा प्रद्युम्नः तस्य श्रृंगारवर्णनस्य गोपर्द विशेषस्य तो वेच कारमार्गे पुत्रत्वस्य किं विशिष्टे पुरीय
तमःस्तुतीर्थं तमो धकारे येषु तत्कलत्रस्य यत्कुंभं कष्टेन तयत्न्मोहनेन निमित्तेनेत्यर्थः वर्त्म निमेहा
धकारे श्रृंगारवर्णने नामगोपर्वः को तया सह संभोगं कुर्वीणि जेनेन दृष्टः ततो जेने नोल्कया व्यापादयि
तमारब्धः तत्पत्न्याश्च कष्टाचरणेन प्रतिमुक्तः इति २ सार्धं द्विजैः संवृतया श्रिजिसावजेयेषु षिख्यातकर्ज॥
स्यवेषेण तयस्तसेनस्य तयोपपन्नाराजः पुरीभूयतिभिः पुरुषे सार्धमिति राज्ञो जनकस्य पुरीनगरीभूमिप
तिभिः राजभिः पुरुषे एतावभूव ख्यातकर्जस्य वेषे कर्जस्य कुलोत्पन्नो ख्यातेराम तेषु षितयागते सति
द्विजैः सार्धं ब्राह्मणैः सहेति किंभूते तस्मिन् जिसीजयनशीलतया संवृतयोनिसंवृते प्रकाशितेथा
मेन जोयस्य तस्य जनकस्य किंभूतस्य तयशसेनस्य तये जानातीति तयत्ताना दृश्ीसेनायस्य नयोपपन्ने
ति पुरी विशेषणं तयेनोपपन्ना पदे रोतायतसेनस्य पुरुषस्य नगरीं तपुरे रघ्रोयि तपुरे शिरस्त्वा लते न
कारः द्विजे ब्राह्मणैः सार्धं जिसावर्जनेन यागते कर्जादिराज विक्रेतिष्टनी निकर्जस्यः ख्यातः कर्जस्य॥

ग्रं·
ये·
२२
27

यो वंशस्तत्र भवस्तादृशस्य संभृतएव वंशात्मरूपेण तत्र मध्ये वस्थानान्तःसंवृत तथा निगुञ्जस्तीयते जसि च भ्रालोल

चामरमालोलचित्रं नरालेश्छत्रैस्तत्रान्कैरे स्तवकिता पृथिवीश्वराणां नानादिगंतरजुषां कमलाकराणा

मेकालयत्वमिव सा नगरी जगाम भ्रालोलेति सा नगरी जनकनगरी उपदनगरी वा पृथिवीश्वराणां

पद्माकराणां सरमासे कालयत्वमिव एकस्थानस्थितत्वमिव जगाम गच्छति स्म कमलालक्ष्मीः क

रे हस्ते येषां ते कमलाकराः सलक्ष्मीका इति विशेषणं वा एकस्यालयस्य वसने भावः एकालयता

धारणे विशिनष्टि छत्रैस्तत्रान्कैरनपत्रसमूहैः स्तवकिता अर्थात्पृथिवीश्वराणामेव ईश्वरलोलचाम

राएवमरालाहंसा सैस्तिन्नमेनरालेयेषां ते यद्वा कमलालयानामेकालयत्वं जगाम सरसामुत्तुङ्ग

स्थानेवभूव सा नगरी पृथिवीश्वराणां छत्रैस्तत्रान्कैरे स्तवकिता कमलाकराणामपि कमलमध्ये राज

हंसा भ्रमन्ति वैन्ते इति नानादिशामेनरज्जुषां तत्र मध्यस्थितानां तत्रागतानां सरसामपि विशेषणम्

नानादिगंतावकाशवर्तिनामपीत्यर्थः ततयत्रापि समाने ५ सद्योसहस्राभरणकिरणैः पूरयन्तो दिग

न्तान्वीर्योत्कर्षादहमहमिकोद्भूभृतो दर्शयन्तः वैधर्म्यं वैधर्म्यात्स्वर इव इवते भूषिताः सानुभागे दक्ष

पक्षे विहितमतयः शोभयंतिस्मरंगम् सद्य इति ते भूभृतो राजानः रंगस्वयंवरस्थाने शोभयन्ति स्म

अशोभयन्नित्यर्थः उभयत्र तुल्याः किंभूतास्ते सद्यस्तत्काले सहस्राणां मार्जितानामाभरणानां कि २२

रणैर्दिशामंतान्पूरयन्तो अस्पष्टवानाः वीर्यस्य सामर्थ्यस्योत्कर्षादाधिक्यादहमहमिकामहंका

रंभामिव वरिष्यती वंक्तं पंदर्शयंतः मैथैवंयं ग्राह्या इति प्रहृष्टमैवैषामथ्येसमर्थोऽरूपादिसंपन्न इति एतच्छु
त्वा किंविवृहोमैथैव साध्य इत्यव ह्तानानायतेइति द्वतः नस्यायत्तं सा हस्तकौर्मैत्यर्थः नत्रविहितामति
यैस्ते ये मनसाप्युद्वहयतितेहृएणन मैथैव वलादिथैहृतंयाइति कुतोयोगाऽन्यथः केकमिवशाभयंति
वैध्यास्त्रवो विंध्योन्यत्रातु मोवैध्य विंध्यसंवधि नेसात्तु भागेशिखरप्रदेशामिव विंध्यभवाः वैध्याः विंध्य
स्यायं वैध्यस्तमिति पृष्टिताः ऊस्तमितः समुज्जवा ग्रथान्तरूपेणजनेनगुप्ता मनोत्तवेषनाथामनुजेंद्र
कन्या उपाययौ लोचनवर्त्मसत्तामात्तेवमूर्ता मकरध्वजस्य ग्रथग्रनेनतं सामनुजेंद्र कन्यामनुजेंद्रस्य
जनकस्यद्रुपदस्य वा कन्यासीना द्रौपदी वा रात्ते लोचनवर्त्म लोचनपथमुपायया प्रापगता नेसा इ
त्यर्थः किंभूता ग्रनन्यरूपेन योग्येन जनेनरहिता गुप्ता मनोत्तवेषा मनोहरालंकारा मकरध्वजस्य
कामस्यमूर्ता कृतशरीरपरिग्रहाग्राज्ञा इव सर्वचित्ताकर्षणात् सा नत्र यानादवतीर्यतन्वी सौदाम
नीवांवुदराज्यमध्यात् समीपमायस्वपणीकृतस्य चापस्यपृथ्यायुधचापयष्टिः मात्तेवेति सा तन्वी सी
ता द्रौपदी वा तत्ररंगीनादवतीर्य चापस्य धनुषस्समीपमागता किंभूतस्य स्वस्य स्वकीयविवाहवि
धिप्रतियादनस्य पणीकृतस्य शुल्कीकृतस्य स्वेनात्मना पणीकृतस्य वा का इव श्रेवुदराजिमध्यात्
मेघपरम्परायाः ग्रेनरेनः सौदामनीव विद्युदिव यथा विद्युन्मेघादवतीर्य शक्रधनुषः समीमागच्छ
तीति मनुजेंद्रकन्यासा का पृथ्यायुधस्य कामदेवस्य चापयष्टिर्धनुर्दंड इव नयाजगज्जयित्वात् श्रो

गा
मं.
२८
28

क्तिमूर्तिमयी स्मरस्य जगतो नारीमयं मण्डनं कान्तामप्रमानकल्पनकलाकौतेस्समभेजनं लक्ष्मी
संसृतिसागरस्य सरसी लावण्यपुण्यप्रभा सीमा राजकुञ्जचक्षुषो हृणमभूदानंदपण्यस्थली प्राक्तिरि
ति सामीनाङ्गोपदी वा राजकुञ्जानो राजलोकानां चक्षुषां नेत्राणां हृणं मुहूर्तं मानंदपण्यस्थली अभूत
इत्या आनंदएव पण्यं क्रयविक्रयवस्तु तस्य स्थली तत्स्थानं वभूव आनंदएव पण्यं यस्मिन् सा तादृशी स्थ
ली इतिवा किंभूता स्मरस्य कामस्य मूर्तिमयी कृतशरीरपरिग्रहा शक्तिः रतिविशेषः सामर्थ्यं वा श
क्तिरस्यां तेरेगीर्यां मत्स्य ह्यादेीवलेखियामिति विग्रहः जगतः संसारस्य नारीमयं स्त्रीरूपं मण्डनमलंक
रणं कौतां नो स्त्रीणाम प्रमाणकल्पनायाः सादृश्यपरस्या कलानस्याः कौतेः सम्भ्रेजनं प्रकाशिके
कलावैदग्ध्यशिल्पादौ कलना कालमाने यो रिति यादवप्रकाशः संसृतिः संसार एव सागरस्तस्य
लक्ष्मीरिव कमलेव लावण्यपुण्यप्रभा सा सरसी वेति लावण्यमेव पुण्यं प्रभासीति सौन्दर्यध्वजपताकानि
खिलभुवमनः संखेला लोकचक्षुः पक्ष्मस्पन्दबुदामस्मरगुनि हृदयाकर्षणः कामपाशः तारुण्या
द्यानवल्लीपतिसृष्टकनकलाकामकोदण्डमौर्वी रेजेनत्ता लेनाग्रे वरवरणकृते कल्पिता पुष्पमाला
सौंदर्येति तस्याः सीतायाः झोपद्याः वा भुजलतायाग्रग्रथिता पुष्पमाला वरणमाला रेजे शुशुभे वा
स्यजामातृवरणार्थं स्वीकारार्थं कल्पितेति तां विशिनष्टि सौन्दर्यलक्ष्म्याः पताकावैजयंती पता
कावैजयंत्यां च सौभाग्यनाटकांगयोरिति विग्रहः निखिलभुवजनमनसां संखेला स्वच्छंदवनरज्जुरिव २८

तथा लोकवल्लर्याः पक्ष्मसंवृतस्य निमेषस्य मुद्रासो निरामः स्मरमुनीनां देवमुनीनां हृदयाकर्षणः कामपाशः
कंदर्पास्त्रविशेषः तारुण्यमेवोद्यानं तस्य वल्लीवलनेव पक्ष्मः सकृतनस्य रूपस्य कलेव कामकोदंडस्य का
कामधनुषो मौर्वीज्येव सौंदर्यसिंधोरुदितेव लक्ष्मीर्लावण्यमस्या नियतं तस्यैव यदेतत्तापी पक्ष्मणश्चे
दे मनुष्यलोकेप्यनिमेषभावः सेति सा सीता द्रौपदी वा दुग्धसिंधोरुदिता तस्थिता लक्ष्मीरिव अस्याः
लावण्यं नियतं निश्चितं तस्यैव ग्रसनमेव कृतपकमित्याह यतो हेतोरेतल्लावण्यमेतस्याः सीतायाः द्रौ
पद्या वा लावण्यं निपीय दृशा कर्णामनुष्यलोकेप्यनिमेषभावः निमेषशून्यत्वं प्रपेदे प्रापि देवानामप्यनि
मेषता तथा पानादितिभावः राज्ञो मनोदर्पणमण्डलेषु प्रत्येकमेकाग्रगपत्स्फुरंती रराजबाला कुमुदाकरे
षु लेखा हिमांशोः प्रतिबिंबितेव राज्ञामिति बाला सीता द्रौपदी वा राजसुसभे एकाइव कुमुदाकरेषु स
रःसु प्रतिबिंबिता हिमांशोश्चंद्रस्य लेखा कलेव किं विशिष्टा राज्ञां नृपाणां मनोदर्पणमंडलेषु आदर्श
सदृशेषु निर्मलेषु मनस्सु प्रत्येकं युगपदेकैव स्फुरंती चंद्रलीलाविवादके हि निसाम्य पुष्पैर्विचित्रैर्ग्रथितो
विरेजे तस्याघनः कुंचितकेशपाशः तदुक्तं पक्ष्मोन्नमगंधलोभात्संगीभवद्भृंगपरस्परेव पुष्पैरितितस्याः
सीतायाः द्रौपद्या वा विचित्रैः नानाविधैः कुसुमैर्निबद्धः घनः सांद्रः कुंचितः अरालः केशपाशः राज
न तस्याः सीतायाः द्रौपद्या वा वक्त्रोद्भवस्य मुखपद्मस्योन्नमद्गंधलोभादुन्मुखसौरभलोभात्संगीभवंतीति
विडाभृंगपरस्परा भ्रमरपंक्तिरिव वक्त्रस्य तस्याः प्रथमो ह्यशोभान्तारापतिमण्डलमालपमानोः तथापि

रा॰
चं॰
२५
29

नो साम्यमुपैति दीनत्वश्चेन तपः प्राप्य पुरारिमौलिं वक्रेति तस्याः सीतायाः द्वैधप्रावाम लवस्याननस्य कान्तिं प्रसमी
क्ष्य दृष्ट्वा तारापतिश्चन्द्रः शोभाते नाराधितस्य मन्दुलेप्राप्य पतयो मुखस्य साम्यप्राप्त्यर्थं तपस्तत्रमिवेत्यर्थः तथापि ते
न मुखाभ्यो साम्यं न प्राप्य यतः अत एव दीनः हीनः क्षीणः सेवुरारेः शिवस्य मौलिशिरः प्राप्य किमर्थं तपस्तत्रञ्जे तप
सा तत्साम्यं भविष्यतीति एतस्याः नेत्रशोभां न तुलयति नयतो खञ्जनः प्राप्तकीर्तिर्नून्नेव तातापि हेतुः अथ
तिपदमतो योगयुक्तस्तपस्वी तद्वनीलोत्पलेन प्रतिदिवसमतो मानमप्युग्रविषाः कोतारं तद्वदेण्यः प्र
थितमिहयतो नास्त्यलभ्यं तपोभिः एतस्याः इति प्राप्ताकीर्तिर्येन ग्रथान्तौदर्येण सप्राप्तकीर्तिः खञ्जनः
पक्षिविशेषः वातापि नामदैत्यविशेषस्तस्य हन्तुः नाशकस्यागस्त्यस्य तपोवनं श्रयति गच्छतीति तपस्वी
योगयुक्तो ध्यानवान् तपश्चरणायेति भावः तद्वदिति यथा नेत्रशोभामलब्ध्वा खञ्जनो दक्षिणाशां
प्रतिगतस्तथा नीलोत्पलेन तपश्चरणाय प्रतिदिनमप्सु मग्नं तन्नेत्र शोभाप्राप्त्यर्थमित्यर्थः यथा खं
जननीलोत्पलेन तद्वदेणाः पितृतिरण्यस्तनेत्रशोभाप्राप्त्यर्थं तपश्चरणाय वने प्राप्ता इति कदेत्याह तथ
दा इति सर्वत्रैव योज्यं यतः एतस्याः सीतायाः हेमपद्मावाने नेत्रशोभां न तुलयति न सहत्याको रोतिन्न
न मुखस्य छायां कान्तिं श्रेवत्या हृयतः इहजगति प्रसिद्धिमामेवप्रसिद्धसेव तपोभिरलभ्यमप्राप्यं नास्त्येव सर्वमेव
तपसा लभ्यते इत्यर्थः कान्ताराः सीमहारण्यमिति विश्वः तद्दन्तशोभा सत्रु कर्तुमेषा नाम्भृदितोदा २५
डिमबीजपङ्क्तिः प्राक्कातनोस्याहृदयं विदधेतत्त्रापयुक्तमपूर्वमौर्ध्वमेव तद्देतेति तस्याः सीतायाः

ड्ढौपयावादंतशोभामंतकर्तुं सदृशीकर्तुं च यथा दाडिमबीजपंक्तिः यतो हेतोः शक्ता समर्था नाभवत् अव
मन्ये हृस्यैतेर्ष्ययैव अमर्षेण वनतापेन तप्तस्याः ग्रथा दाडिमपंक्तेः हृदयं विदीर्णमिति नदीय सौंदर्यं सरो
रुहणाले भुजद्वयं रक्तकरांबुजाभ्यां विकासमनार्थं रविरश्मिमत्स्यान लोशवोग्रप्रसरे तिशोणः नदीयेति
रक्ताभ्यां करांबुजाभ्यामुपलक्षितं भुजद्वयं तस्याः सीतायाः ड्ढौपयावाइदंतदीर्घसौंदर्यमेव सरस्तंभरुहणा
लमेवेति न हि कासनार्थमिव तयोरग्रेन लोशावः शोणलोहिताः प्रसरे निरविकिरणत्वात् इतितत्सदृ
शाइत्यर्थः सूर्यकिरणैररुणांबुजे प्रकाशयमिति नन्वेभ्यः स्फुटमनु निशावद्वकोशालिभ्यः सानुक्रोशेनि
जरुचिलवो दीयतामंबुजेभ्यः इनेन तस्याः प्रतिपदमिव व्याहरन्त्याः अपांनेपादद्वंद्वे ललितचतुरं नूपुराभ्या
मुपात्तं नन्विति एतस्याः सीतायाः ड्ढौपयावा पादद्वंद्वे चरणयुगलं नूपुराभ्यां पादकाभ्यामुपांनेसमीप
तपीनं गृहीतं तत्सत्रिधार्याग्रातमिति यावत् प्रतिपदं प्रतिचरणान्तिपं व्याहरन्त्यां नूपुरव्याजमिव किंत
दित्याह नन्विति संबोधयते एतेभ्यः पद्मेभ्यः सानुक्रोशं सदयं यथा स्यादेवं निजरुचेः निजकांतेः
लवएकदेशो दीयतामिति किंभूतेभ्यः अत्रानिशं प्रतिरात्रि बद्धः कोशाप्रवालेलियैरेवंभूतेभ्यः किं
भूतं चरणयुगलं ललितेन चतुरं मनोज्ञं ललितचतुरं स्फुटमत्र सीताया गमनं मलमयानेः कंगल
श्रीं ऊर्वाभ्यामविकलकरणशोभामहरत्कांड्वयेन यदियमहरदेषांहेतुना तेन नूनं निजवपुर्विकी
र्णाः पांसुस्परांदिग्यंति गमनामिति तेन हेतुना तेन कारणेन कोषेंद्राः हस्तिश्रेष्ठाः निजेस्वेव प्रापिता

पां॰ वं॰ १ पांसुसरं स्थलिनिबद्धांजलिं पंक्ति तेन केनेत्याह यदिति नूनमज्ञात्मेदायांयय स्माहूतो इयं सीता द्रौपदी
नापक्षांकीडाणां गमनेन गतं श्रुलमयानैर्मंदयानैर्जहार एवं कुंभयोः गंडस्थलयोः लक्ष्मीशोभां।
उचाभ्यां स्तनाभ्यामहरत् अविकलां संपूर्णां कलशोभां स्थूलहस्तकांतिमृदकांडद्वयेनाहरदिति
अन्योपि सर्वस्वहरणेन दुःखितः मारीरेस्थलिं दिशपतीत्युत्प्रेक्षा मन्येपांके अवंशायोनूनमित्येव।
मादिभिः तत्प्रेक्षा व्यज्यते शाहे विषमाक्षेपितात्स्यादिति एवं नरेंद्रे वितर्कयत्ततो वोलोकावय
वंतदीयं उत्तदिष्यपानीनिपुणेन वाणीमध्ये सभं केनाचिदित्यभाणि एवमिति केनापि निपुणे
नकृपालेनाधिकृतेन पाणी हस्तावुत्क्षिप्य उत्तोल्य मध्ये सभं सभामध्ये इत्यग्रे वक्ष्यमाणा वाणीव
चनमभाणि उक्ताः तदीयं सीतासंबंधिनं द्रौपदीसंबंधिनं वा पूर्वोक्तमवयवं शरीरावयवं विलोक
दृष्ट्वा नरेंद्रे एवं पूर्वोक्तप्रकारेण वितर्कयति सति भयत्रस्तमानं उपानमं पत्ररिदमीरिशराहते।
निर्जोज्जसा कालितग्रणं विधायपः प्रदर्शयेत् परिषदि लव्यलक्ष्यतां जयाश्रियामहूलभतेस्कन्य।
कां किं तदित्याह उपानयामीति इमां कन्यां सीतां द्रौपदीं वा सलभतिग्राम्न्यात् जयाश्रियामस्तहजय
लक्ष्म्यास्तह सकइत्याह य इति परिषदि सभायां इदं यत्रः कालितग्रणं दत्तज्याकं प्रदर्शयेत् प्र।
काशयेत् लक्ष्यलक्ष्यतां सीतायां विधाय लक्ष्योलक्ष्योरुद्धयस्योवरोः तस्याभावः ततानां लक्ष्यलक्ष्य
तां पत्रांतरे यत्रः कालितग्रणं विधाय लक्ष्यलक्ष्यतां राधायंत्रावेधं प्रकाशयेदिति केन कालितग्रण। ३-

मित्याह निर्जेनौजसा बलेन किंविशिष्टं तत् ईश्वराद्धृतं महादेवं विशापमन्त्येन दशाननसंज्ञेनानमपि
तं पाप्मामिति इति वचसि तदानेमुक्तमात्रे नरेशाः स्थूलतरभुजदर्पा लक्ष्मणाग्रजस्यापि पीठात् उत्ततरम
भिवेत्य तस्माद्धनुर्भीमरूपं फणिपतिमिव भोगिग्राहिणोग्रं गृहीतुं इत्थं नीति इत्येवंविधप्रकारेण वचसि त
दुमात्रे सति तदानीमव्यवहितेनैव कालेन एव नरेन्द्राः स्वयंवरस्थाः राजानः तूर्णं शीघ्रं पीठात् सिंहासना
दुत्थाय पद्गुतपदं यथा स्यादेवं तत्पाणीकृतं धनुर्ग्रहीतुमभिपेतुः पतन्ति स्म मीपं जग्मुरित्यर्थः कीदृ
शं धनुः उग्रं भीमरूपं भयानकमिति किंविशिष्टाः स्थूलतरो महान् भुजदर्पो येषां ते अतिबलिन
इत्यर्थः भोगिग्राहिणः सर्पग्राहिणो जांगुलिकाः कल्पानीवाहिपतिं सर्पश्रेष्ठमिव ते यथा बधादि
नाबलिष्टाः तमपि भीमरूपं भयानकमिति कन्यां निधानकलशीमिव कार्द्रिकं च भीमं भुजंगमिव
तस्यातिबंधभूतं दृष्ट्वा विलोलमनसः कातिचित्तिनीषानादातुमक्षितमापि दमतामवापुः कन्या
मिति कातिचित्तितीषाराजानः तद्धनुरादातं ग्रहीतुमक्षितं त्यक्तं वा न दमतामवापुः न समा
र्थी बभूवुः किंविशिष्टा विलोला दोलायिता मतिर्येषां ते तथा पनत्रमनेन असलाभस्तनमनं चा
प्राक्समतो यदि तन्न स्यात् तर्हि कथमेतल्लाभः स्वभयरूपत्वं किंभूतां त्वं आह कन्यामिति सीताख्यां वदीवा
निधानकलशीमिव यथावेदां दृष्ट्वा दत्तुं त्रसने नैतल्लाभ इति अक्षितं न दमाः कार्द्रकं च भीमं भुजंगं
मिव कालसर्पाकारं तत्पातिबंधभूतं तल्लाभप्रातिबंधकं दृष्ट्वा विलोक्य आदातुं ग्रहीतुमापिन दमाः

रा॰ यं॰ ३१ ३) केचित् कर्म्मांनिधानकलशीमिव नाशात्तं न वात्यतां लाभमनामवाप्नुरितियोजनं यानितत्स्यातिबंधभूतं भीमंभु
जंगामिव यत्र विलोकेति निधिकलशीसाम्यादादाने ध्यानतस्यातिबंधकर्त्तीभुजंगादर्शनात्यागेच्छेति भु
जंगस्यातिबलत्वादन्यत्रागमनेन तत्स्यातिबंधापगमात्तल्लाभः स्यादिति परामृष्यास्य स्थानान्नास्थितत्वमूह
इतिभावः साभिमानमनसोनराधिपाः केचिदाचरितवाङ्मात्राहताः केपिचापनतिवाङ्मविलोवाः कुर्व
ते स्मानिजमानमानतं साभिमानेनेति केचिद्राजानः तिनंमानांधितत्समुन्नतिं मानतंन प्रकुर्वते स्म मान
हानिमवाप्नुरित्यर्थः किंविशिष्टाः आचरितंवाङ्मात्राहसंयैस्तेकृतनबाहुश्रमाः साभिमानं मनो येषां ते
माहमकरस्त्यर्थः तथाकेचिद्राजानः चापस्थनतौन मनेराङ्मविलवोयेषांते चापनमना समर्थाइत्य
र्थः केवलं निजमानमेवानतं कुर्वते स्मनतं चापमितिभावः मानश्चित्तसमुन्नतावित्यमरः इत्यकेचन
केचिदीक्षणापघावन्येकारस्पर्शनादेकेथारणातः समर्वामितरेमहीकरास्फालनात्तु आनम्रीकरा
णात्परेकतिपयेज्जीवारनीचंठनाकीर्दंडेन यशालिनीवत्नपतौवंध्यश्रमास्तेभवन् इत्यादिति ते
राजानः तस्मिन्कोदंडेयत्रापिवंध्यश्रमानिष्फलश्रमाश्चभवन् बभूवुः किंविशिष्टेतास्मिन् नयशालिनि
नृपताविव यथानीतिप्रसक्ते राजानि अपरेन्त्ववतयो नयवंतोवंध्यश्रमाभवंति तद्वदिति कथामित्या।
दु इत्यादिति केचिदूरात् यत्रदृष्ट्वैवेत्यर्थः वंध्यश्रमाश्चभवन्निति सर्वत्रसंबध्यते केचिदीक्षणाप
घात् यत्रदृष्ट्वानिवृत्ताइत्यर्थः अनत्यवसायादिति अन्येकारस्पर्शनादिति गत्वादृष्ट्वाहस्तस्पर्शनं ३१

कृत्वा तत्कारणान व्यवसायादिति पक्षे यावारणान इति समार्वं यथा स्यादेवं संश्लेषोऽस्येति तदग्रिमव्यापारान
व्यवसायाद्विहृत्ता इति पक्षे प्रानम्रीकरणमीषन्नम्रीकरणं तस्मादित्यर्थः कातिपये जीवाटन्योः यद्वा धौ।
ज्याल्लयोर्वंहुनाम्फालनार्थं शरसंधाने स्वसामर्थ्यादिति भावः उभयत्र समानं स्त्राङ्गं गचेदिमगाये प्राज्ञ
स्तरेभ्रत्तत्रायराजसजलं मनसा ददत्स जिष्णुर्द्विजेंद्रनिकरात् हरिवंशकेतनर्गभी दिवाधिराणोहृदगा
तकुमारः कुमारो रामः द्विजेंद्रनिकरात् विश्वामित्रसमीपात् उद्गमात् गृह्णितः प्रस्तावात् तद्धनुर्ग्रहणा
येति जिष्णुः जयनशीलः हरिवंशस्य सूर्यवंशस्य केतुः ध्वजवच्छोभमानः अरणीयति मंथानकाष्ठस्य
गर्भात् मध्याद् दहनिरिवोद्गमात् सद्वंशं गाचेदिमगाथादेशीविशेषो वा तेषामीश्वराणां देशाधिपतयस्तेषु
यः स्मरणशुश्रूषणपरायेवां प्रत्यष्टूतिधुराजसद्दानाय शृतकल्पायद्वाविपायजलं जलं जलिं ददत्स मनसा।
दानायद्वात्रयमीयेति वा मनसेवेति लत्रं चैपिपीतिमनसि हृत्वेत्यर्थः पक्षे जिष्णुः कुमारः अर्जुनः वा
सणसमीपाडुद्गमात् हरिवंशकेतनवितिहरिवंशस्य सोमवंशस्य केतुः यद्वा हरिः हनूमान् वंशावे
णौ यस्य तादृशः केतुः यस्येति वा यद्वा हरीणां वानराणां वंशः समूहस्तस्य केतुः हनूमानिव सेनापति
त्वात् हरेरिंद्रस्य यो वंशस्तस्य केतनं ध्वजो वा तस्य सत्वादर्जुनस्येति हरिरिन्द्रार्कवातास्यशुकभेकयमाहि
षु कपौ सिंहे वंशाक्षे वेतिमेदिनीकरः वंशो वर्गे कुले वेणौ पृष्ठस्यावयवेपि चेति विश्वः वीरश्रीमा।
नतंगाचलत्तलनत्तलादंडश्चर्वीपतीनां गीर्वाणद्विषिगर्वांशुपिमथनमहारंभमंथाचलेंद्रं स्यायाति

रा·पां·
टी·
३२
32

स्नाणकोणेजगाडवर्षमहाभूप्तिमाहिंस्वाधेवाधंदोर्विक्रमात्मनेसमिथमिवनिजस्यादर्येराजसूनुः वीरेति राज
सूनुः नरपतितनयोरामः यत्तरादयेजग्राहकीदृशेवीरस्यभूरस्यश्रीःलक्ष्मीःमानक्षितसमुन्नतिश्चैतोर्भो
ववलाविवपर्वतविततयोस्तलनेनत्वादंडमिव स्वर्णकारस्तुलामिवेत्यर्थः तुलासादृश्यमानयोरितिम
दः गीर्वाणेति गीर्वाणादेवास्तद्द्विषिणां दैत्यानां योगर्वोद्धुतिःगर्वसमुद्रःसएवपर्वतःतं स्नाघेनिस्नाघ
शंसानदर्थयोनिस्नाणेनविशिषाणस्यकोणं वादनदंडमिव स्नाघास्तियोभ्रशंसायोपरिवर्यमिला
सयोरितिमेदिनीकरः कोणोवीणादिवादनमित्यमरः दंडयत्तुरिव दोर्विक्रमात्मनेःभुजपराक्रमानलस्यस
मिथमिवहोमद्रव्यमिवसमित्यंदीपकमितिनिवित्त् पदे राजसूनुरर्जुनः प्रस्तुतस्माने ॥ ४४स्मोभिसरं यतः
परिषदावाल्यादववेनोत्तरं गदकृतव्यवसायनिश्चलधियामस्मादक्तोत्तरं उद्दिष्टानसयान्भजाग्रतर।
स्मासोड्डीभवद्भिस्मयेस्यालेखामदनीमविनयदयन्केनापिनालोकितः ॥ ४४इति सरामःअर्जुनोवा
यतुर्गृहीतमभिसारन् यत्रघोभिसवंगाक्रन् बालोयमसयाख्यानिर्वाहेनभविष्यतीत्यवत्तोत्तरं साव
त्तंयथास्यात्तथा परिषदासभयाहृष्टेवलोकितः ४४इतिसर्वत्रसंबध्यते तथायतुर्गृहस्तन् श्रयथव।
सायेन निश्चलयाधियायुक्ता सस्माद्यसगौरवेदनमतरंप्रतिवचनंयस्योक्रियायो सस्मादक्तोत्तरंय
थास्यादेवंहृष्टः भ्रनेनप्रतिज्ञानिर्वाहःस्यादितिभावःभुजेति तथाभुजाग्रतरसाहलबलेनोत्सिक्ता।
नोनत्वयतः नमयव सोड्डीभवद्भिस्मयंयथास्यादेवंहृष्टः सोड्डीभवन् निविडीभवन्विस्मयोयत्र भ्र ३२

दोषस्यवधः अदोषस्यब्राह्मणबालस्यत्यादिनाविस्मयः ज्यालोपामिति ततः अदनीयविनत्यालोकोग्र
णेनहृदयन्केनापिनहृष्टोनचावलोकितोलज्जयेतिभावः एवम्भूतप्रकारावित्यर्थः २७ तस्मिन्नुग्रे
कर्षणकर्मणिधीरेरामात्मजेशंकरकार्मुकस्य बभूवभंगः पृथिवीश्वराणांकर्णाग्रपातादायिकदुस्वन
स्य॥ तस्मिन्नृपात्मजेरामेगुणास्यधनुषःग्रहणस्याकर्षणकर्मणिधीरेधैर्यशालिनिसतिसंकरकार्मु
कस्यधनुषः प्रवियमानेशंकल्याणेयत्रततभंगोविदारणंबभूवतत्तुल्याभावोऽभूत्इत्यर्थः तथापृथि
वीश्वराणांकथंभूतस्यपृथिवीश्वराणांराज्ञांकर्णयोरग्रपातादर्शीकठंदबनोयस्येति एवंभूतस्य एते
धनुषोऽप्रकल्याणंयथास्यात्तथा राज्ञोभंगोबभूवेतियोज्यं रात्नात्मजेऽर्जुनेनकरकार्मुकस्यद्दष्टस्तथनुषोग्र
णाकर्षणकर्मणिधीरेप्रागल्भेसतितिवृर्जनस्यकीर्तिलाभोऽनेनास्यसुकल्याणकारित्वमिति भेदो
गतरेशोषभंगोजयविपर्ययेऽत्रतिमेदिनीकरः २८ साकेकयेन्द्रानभंगोप्रपन्नेचापेनतस्मिन्निहतालस
सिज्ञा वीजनमासादरेराजपुत्रीकीर्त्याशसेवायाहृघाकुमारे॥ऽराजपुत्रीसीताकुमारेरामेप्राप
हृद्याहृदयानंदजननीकीर्त्याकीर्तनीयावीजनमावीजनमासलज्जाइत्यर्थः लसप्लोहोसोऽस्या
समीचीनवरस्यसिज्ञाप्रात्यानिर्हृतास्वयस्याकीर्त्यचलक्षणीवात्सनीया तस्मिन्चापेभूयैःसाके
मानभंगोप्रपन्नेसतियत्रवानमनेनप्रमाणमंगः राज्ञोवनमनाशज्ञामानहानिरभूदित्यर्थः मा
नःमाणेप्रस्यासेमानक्षितोन्नतोपदेशतिविश्वः एतेराजपुत्रीद्रौपदीकुमारमर्जुनेनकीर्त्यशसाया॥

रा॰ च॰ ३३

33

ममाभिरामं यदाकीर्तेर्व्रारामतपवनभूतंस्थं तस्मिन् लक्ष्मासिद्धाराणां यथाचक्रवेषधनूपवस्यलक्ष्मस्पारः।
वस्यासिद्ध्यानिर्वहणोनिर्निर्हृतास्तत्रस्थिता अन्यत्समानं २९ श्रृंगाग्रातेरंगासौरभ्यलब्धेः कृत्स्नातन्वी।
हृष्यमानालतेवसातंभेजेराजवंशप्रदीपंपूर्वाभोधिंस्वंप्रवंतीवसीता। श्रृंगाग्रातेर्भ्रमरस्समूहेहेले।
दितासासीतातंरामंराजकुलस्यतपवंशस्यप्रदीपंप्रकाशकत्वात्. भेजेसिषेवेकिंविशिष्टेरंगा।
सौरभ्यलब्धेः स्वशरीरसौरभलब्धेरित्यर्थः कीदृशीमीनाकृत्स्नाशयामलातन्वीकृशालतेवहृष्य
मानाभवति श्रृंगवातेर्वाहृष्यमाना मीनार्केवपूर्वांभोधिंपूर्वसमुद्रंयास्यंतीस्वंप्रवंतीगंगेवपदे
कृत्स्नाश्रीपदीतमज्जनंस्वंप्रवंतीसीतेवसीतानाम्नागंगेवसीताचगंगाभेदइतिविश्वप्रकाशः विस्मा
पादस्फुरद्भूतालावर्यंतीकमंडलं समंताद्भ्रमणाः त्रपणागंगापतातिवेदिकः सातत्रपतितादिह्वचन
वाप्रतिपद्यते सीताचालकवंदात्तवक्राभेतिचवैकमातृशनि श्रृंगालस्वेनभ्रमरस्समूहेलंतेवहृष्य
मानाराजाचंद्रस्तस्यहंशोराजवंशस्तत्रप्रदीपंसोमवंशप्रकाशकंपोषंसमानं ३ रात्रांलज्जाकलं
कः खलुशावशारीनिस्थापितः कांडकेनद्वेपिस्थंतस्यकोटौनिर्गणातुपहितारजत्रत्रेणामौर्वी
न्यस्तातदारुभूलोनिजवरणस्थावीसंत्तमालाक्रमार्यामालायांसाव्यवादैःसहस्तकलत्तनैरर्पिता
नेत्रमाला कान्तकेनापत्रपाराताम्राखशरीनिवक्त्रचंद्रेलज्जानूपःकलंकःस्थापितः तस्यपत्र
वःकोटौअग्रेद्वेपिस्थंप्रतिषीवंयथास्यादेवांनिर्गुणंचयथास्यादेवंराजपुत्रेणरामेणार्जितेनव। ३३

मौर्वीज्यातत्पाद्धितानिहितातद्वाकुमूलेराज्ञश्चवाकुमूले स्कंधेतद्वरणमालावीतद्भयवरणस्रग्द्वरण
मालाकुमार्यासीतयाद्वैपद्यावामंद्भग्रीवेरंन्यस्तामारोपिता तस्यांचमालायांसाधुवादैः सहस्रक
लजनैः नैत्रमालापितेतिमालादीपकं ४९ भवनेस्माहेगतवतिततः सर्वतोराजलोकेरातातेनस्व
मयभवनंप्रापितानांमहर्षे निर्दिष्टानांश्चानेन्द्रगिरामानर्वेन्द्रात्मजानांसर्वेषामपत्यनातिप्रापा
तत्रवैवाहिकेश्रीः तत्रजनकेनगोसर्वेषांवत्सराणांनर्वेद्रात्मजानांदशरथपुत्राणांग्रापदेवत्तस्य।
कालमेवमावैवाहिकश्रीः विवाहसंपत् विवाहोपयुक्तसंविधानंप्रजानिज्ञाता विवाहोज्ञातश्रुति
वा किंभूतानांमहर्षेणावनेतेयत्रतत् महर्षिपथारुणादेवंतेनराज्ञाजनकेनानिजंभवनंप्रापिता
नांकस्मिन्सतीत्याह भवनउत्साहोपस्यतस्मिन्राजलोकेसर्वतोगतवतिसातिस्वकीयगृहंगतव
तीत्यर्थः तथाकिंभूतानांसातियौगुरुविश्वामित्रश्चानेगुरुस्तेनगिरानिर्दिष्टानामनन्तानांप।
त्नेनवेंद्रात्मजानांतेषांरथिष्टिरादीनांतत्रतस्यांद्वैपद्यांवैवाहिकश्रीर्ग्रगापतस्हेवसमजानितःसै
कामखिणीत्यर्थः ज्ञानिव्यासोगुरुः कुंतीतयोर्गिरावचनेनानिर्दिष्टानामनन्तातानांतेनराज्ञाडु
पदेनानिजभवनंनीतानामितिशेषंसमानं ५० तेनत्रसर्वेममकालमेवसंप्राप्यदारान्सहदप्यान्विरे
ज्ञः त्रैलोक्यसंपोषनजीगत्कानांगाविभागानिवसिंधुनाथाः तेसर्वेरामादयस्तत्रजनकनगरेस
मकालंतत्त्वकालमेवयोग्यान्दारान्सीतादीनवरोधान् प्राप्यविशेषविराजीकरणोज्ज्वलाः त्रैलोक्यस्य।

संशोधने संपादने जागरूकान्भावयान्नान्विस्तृज्ञानितियावत् गंगाविभंगां गगातरंगान्व्याप्यपयसासत्व
ज्ञः शोभंते तेन गोचरेतल्पकालमेव योगर्पादरात् द्रौपदी प्राप्य विरेजुः शोषसमानं ३३ संबंधां उदितात्मनो
निजपदं प्राप्तुं मनः कुर्वतां दिक्षु अंते शानिबंतबंप्रकिरतां लाजं प्रदीप्तंसः तेषां विक्रमवातवेल्लितनिज
क्रोधानलप्रेरितस्तस्मात् कालइवोदितो भृगुपतिर्उर्योधनोभ्यागमत् तेषां रामादीनामभिमुखं भृगु
पतिः परशुराम आगतः किंभूतो अयोधनोक्षत्रियेन योद्धुं पाकां प्रानः किंभूतो विक्रमो पवनर्भगादि रू
पः स एव वातः तेन वेल्लितः दीपितो यो निजो आत्मीयक्रोधानलस्तेन प्रेरितः प्रेरितो लक्षुक्रूर
तियावत् अत एव सान्द्रः पारीरपरिग्रहः कालइवोदितउत्थितः अत एव कालोपमः इवेति तेषां किंभूता
नां संबंधाद्विवाहात्पिनाकलाभात्क्षुदितात्मनां रूपाणां निजपदं नियागृहं गंतुं मनः कुर्वतां तथा
लाजं क्षात्रियसंबंधिनिजं महत्तेजो दिक्षु अंते शुद्दिशं तेशानिरंतरं क्षिपतां विकिरतां पदेउर्योधनोभिमु
खमागमत् तेषां युधिष्ठिरादीनां कः इव साक्षात् भृगुपतिरिव प्रयाणे अभिमुखः स्थितः अभिमुखः अक्र
प्रयाणो निष्फलदः अकाल इव अत एव कालोपमः इवेति तेषां युधिष्ठिरादीनां विक्रम एव वातस्तेन ते
न वेल्लिता निजक्रोधानलपरितत्पादि सर्वं समानं ३४ सत्कानसमन्तमयाचापंरणकं इति मत्वेडय।
न्तेतास्य परलोकाजिगीषयैव साकं नृपतेः कौशिकनंदनः कुमारः नृपतेर्दशरथस्य कुमारो रामोऽश्रो।
कुमारो कौशिकनंदनो विश्वामित्रहर्षजनकः स्वपरशुरामस्य रणकं इति रणाविकर्षमार्वडयतवड

यातादृशः ततोनंतरं अक्षकारं अर्थादन्येनडुरानसंचार्यं यन्दुरानसप्यानंतं कृत्वा कयासाकं रणकं इतिम
एवंउयत् परलोकजिगीषयेवसाकामिति परलोकस्य स्वर्गलोकस्य याजिगीषा गमनप्राप्तिः तयास
कंयास्वर्गलोकस्य गमनप्राप्तिस्तस्यामीत्याणिपाखंडितेत्यर्थः तस्य स्वर्गमार्गस्यतेन यातिः रुद्धेति भावः
पक्षेकौशीकइंद्रस्तस्यत्वपतेउर्योधनस्यवाणकंइतिमाखंडयत् कयासाकं परलोकेत्यादिपरलोकस्य
शत्रुलोकस्यायाजिगीषाजयेच्छातस्यचेतसितयासार्धमितिपोषंसमानं ३९ अथउपनरथयातेतत्रसं
अथउपनरथयातेतत्रसंबंध्यसंधिंप्रकृतिगुरुरभिज्ञः प्रोज्झितैःकांदमाणाबधिरितभुवनो [illegible] त्मभू
रिभेरीविरावैरुदयिमिवपयोदाःसांपरायेतिभिज्ञः अथानंतरं तेरामादयःसांपरायमयोध्यामभिज
ग्मुर्गताः पयोदामेघाःसमुद्रामिवभूरिभेरीणांविरावैः प्रोद्दैर्बधिरितभुवनांताव्याप्तभुवनांतरालाः
मेघाअपिप्रोद्दैरोदसीदूरयंतीति तस्मिन्परशुरामेसंधिंसंधानंसंबध्यविधायायाउपयातेगतेसतिस्व
स्थानंगतेसतीत्यर्थः प्रकृतिःशिष्टजनःगुरुर्मान्यःसतत्निग्धैःप्रभिः प्रोज्झितैर्विसृष्टैर्बद्धैःकेदर्पना
र्थमाक्रांदमाणाइतिअक्रांदमाणोरिति पाठेसहश्रेकेतृतीयेतितेनतैःसहगताइतियोज्यंपक्षेतस्मि
न् उर्योधनेगतेसतितेअपिशिरःदयःसंधिंसंबध्यविधायप्रकृद्रोणाचार्यःसांपरायंमिंडअस्यंयोषंसमा
नं आक्रांदमाणाइतिताश्रीलवयोर्वचनशक्तिर्वा ३६ सरुद्भिरासैरभिनंदितानांप्रतापविन्यासि
तशात्रवाणां गुणोदयप्रीणितसज्जनानांतेषामभूत्तत्रसहावसानिवासः तेषांरामादीनांगुणविशिष्टादी

रा. पो.
टी.
२५
35

नोऽतत्र गुणं मयो ध्यायामिं इत्यत्रेवामवं यथास्मादेवं निवासोऽवभूव किंविशिष्टानां महद्भिर्मित्रैः रात्रैरभिने·
दितानां कृतप्रशंसानामनुमोदितानामित्यर्थः गुणेन्द्रयेश्रीणितास्मजनायेस्तेषां प्रतापेन विद्याविता
श्रवणोपरवः येत्यथाद्विद्विपक्षाहितामित्रदस्युशाववशत्रवाइत्यमरः २० गुणैर्गरीयस्यायसिभक्तिन
म्राः पृथुयरीणाप्यपिदर्शितैकयाः दिशो विभागाद्युपलभ्यमाना भान्ति स्म वयसार इवार्णवास्ते ॥ तेव
वारोरामादयोभान्तिःस्म शोभन्तेः स्मवत्तद्धुदिहवप्रियमाप्रवनारीर्णवाइवेति स्मगुरुत्वात् दिशो विभा
गानुपलभ्यमाना रात्तोदिविभागानामलम्भन्तातेकार्यमाणगुरोवसिष्ठेज्यायसिजेष्ठेभक्तानम्रा :
गुणैर्ज्यायसि श्रेष्ठेवेतिघाज्येष्टयक्तप्रत्येकंधुरीणे राजकार्यधुरंधरा अपि गुणैर्दर्शितैकयापकीभूय
राजकार्यसाधकाइत्यर्थः समुद्राअपिदिशो विभागान्तापका अपिनम्राः निम्नाः पृथक्क्रियातात्रपिद
र्शितैकापकत्वेनरूपेण पद्दे तेवनारोभीमादयोभान्तिः स्म ज्यायसिज्येष्ठभ्रातरि युधिष्ठिरे गुणै
र्हैतभूतैः गरीर्भक्तिनम्राः श्रेष्ठोगुणः प्रकर्षभूषयेंति तेगुणानघोरापर्वणितेउक्ताः शेषेत्ते २१
तेसूनुभिर्विभौराजाकुमारैः पार्श्ववर्तिभिः समेकरिव विष्कंभेः सहरिप्रभस्यभूषितैः ॥ तेसूनुभिः रा
मादिभिः पार्श्ववर्तिभिः समीपस्थैः कुमारै राजादशरथो बभौ शुशुभे किंभूतैः प्रकर्षेण निष्ठसप्तर्ष
स्यवंशेष्टाहरिरादिस्यप्रस्थानयः समहरिः प्रस्थः सूर्यवंशास्तेनभूषितैरितिनियहाहरिः सूर्यः प्रस्यामा
नेप्रमाणंयस्य सहरिः प्रस्थः सूर्यवंशास्तत्र भूतस्तैर्निर्यषांतेहरिप्रस्थभवतस्मषितैरितिनिपरिप्रस्थस्य २५

सूर्यवंशसंभूविनृषतैर्वाकरवसमेरुवयथाविष्कंभैर्विलासैर्मेरुवादिभिः पर्वतैः समेरुशोभतिमह
हरिणासिंहेनवर्ततेसहवीर्यः प्रभूस्याउत्सेनभूषितैः विष्कंभोयोगामेरुस्याहिलारप्रतिबंधयोरि
तिमेदिनीकरः सानैमानेश्रियायाप्रस्यइतिविश्वः पत्ते पतैस्वन भिर्भीमादिक्रमारैराजायुधिष्ठिरो
हरिप्रस्यभूषितेरितिहंसप्रस्यस्य भविनाषितैः इंद्रप्रस्यस्यसभूषासलंकारमितैरितिवाइंद्रप्रस्थेन
भूषितैर्युक्तैरितितात्पर्यं इंद्रप्रस्थेन भूषितैर्युक्तैरितितात्पर्यं इंद्रप्रस्थेनगरे भूषितैः भूषागतैरितिवा ३९
मुनीशुदिष्टसमयेनविष्टैराराधितानांभूपामामरावैः दिनेदिनेपार्थिवनंदनानांपरस्परंप्रेमभरो
मुमूर्छ ॥ पार्थिवनंदनानांभ्रामादीनां दिनेदिने प्रतिदिनेपरस्परमन्योन्यंप्रेमभरोमुमूर्छववृधे ग्रा
मैः सुशीलेर्वीरैः पत्नीभिर्मदारैर्वाभूषासमन्वयसाराधितानांमुनीशेनवसिष्ठेन दिष्टरूपदिष्टेसमी
येनविष्टैः स्थितैः पतिशुश्रूषापरैरित्यर्थः पत्तेपार्थिवनंदनानांयुधिष्ठिरादीनांमुनीशेनारदः स
मयः क्रियाकालोत्र्यवसेतियावत् यथानृपेण्ववस्याउपभोगार्थंवस्यायंतानामपिद्रौपदीवि
षयेमुनिनैवप्रणीतेतिप्रत्यासमानं दृष्ट्वावलोकेजनानीयदूणांतेजोभिभासुरंतं कृष्णाख्यं राजा
सशत्रुघ्नमनीलसमिंप्रस्थापयंतीर्थनिषेवणाय राजानृपवरः सशत्रुघ्नः शत्रुघ्नासहितंभरतनाम
लघुंकेकेयंतीर्थनिषेवणायउपाध्यायनिषेवणायविद्याभ्यासार्थं मातामहनिषेवणायवप्रार्थ्य
पयन् प्रेषयामास तीर्थशास्त्राध्यवृत्तेचपापनीरजः स्वच अवतारनपित्राशास्त्रपाठोपाध्यायः मे

रा॰पां॰
टी॰
३५
36

त्रिषितिमेदिनीकारः अनिकेतो भस्वानादिसोवेरतन् एवं तेजोदयानं धारयंते जननीगुरूणां पाञ्चादीनां
मिष्टावलोकेऽष्टमाकालितमवलोकनेयस्यांते अनीलः समभिषेकाय स्यांते यदे सम्राजा युधिष्ठिरः पाण्डु
पुत्रेण शत्रुहंतारे अनीलसमिंधेनाश्वमज्ञेनेतीर्थानि वेषणायनसपेस्यार्थे प्राप्यापयत् भ्रातं भरतकैलास
नेअयत्समानं सर्वोसिशैलान्सविनश्वनीवागक्षान्हीनान्मजयेविरेजे सवीरो भरतः सातिशायं सम
र्थविरेजे अशोभत किंविशिष्टः किरीटवान्बद्धमौलिः तथा स्वभुजेनोपगूढमालिंगितं विचित्रं नानारू
पमंगादैर्वाङ्गकटकैर्येनतं सारः प्रभजीतितीवासंतीर्थवाक्षान् तथा अहीनेनाधिकेनात्मजयेनीवि
नाश्रीर्यस्यानमितियद्वान हीनश्रात्मायस्य सत्राहीनान्मासाभिमानाः पुमान् तस्यजयेनेधिताश्रीर्ये
स्यांते यदे किरीटे अर्जुनः स्वभुजोपगूढा विशेषवासनामर्षोग्रश्रुतीयेन सतयाअहीनां सर्पाणांमौः
ख्वरः तस्यात्मजयात्पूपीनोम्नापृथितानश्रीर्यस्य सतथा सम्मानमत्यस्यत् ५२ प्राप्य प्रभासे पदमि
षुयोमितामातासहस्यन अपेत्यराष्ट्रं संतोषितः द्रोणिभर्त्ताद्युतेनिले भसुभद्राधिगमोत्सवंसः समभ
त सभद्राधिगमोत्सवं सष्टुभद्राणांकल्याननामाधिगमोयत्रतं महोत्सवं लेभे प्रापद्रोणिभर्ता
राजा अच्युतेनस्थिरेणसंतोषितः मातामहस्यांते राष्ट्रं केकयराष्ट्रमपेत्य प्रभासंपदं स्यांते प्राप्य दृष्ट्या
मिश्रमीष्टपक्षं यदे सम्यज्ञेनोमातामहस्यानमानत्ययादववेशागतास्तु भद्रायां अधिगमनपरिणा।
यत्रूपेणात्सवसंलेभे अच्युतेन कृष्णेन संतोषितः द्रोणिभर्ता राजा भूमिभर्त्ता प्रभासंपदं प्रभयादीभि ३५

मेघरेखामाल्यशोभितेनतलेन अत्र प्रद्युम्नपारिजातनमस्य हरः स्त्रीरत्नं गुरोरिव रेजे सो भद्रसेनानलब्धा शीतरुचो
न्वयः ॥ अत्र सा च शीतरुचः सूर्यस्यान्वयो वंशः जातो भरतो रेजे भद्रसेनाने कल्याणपरस्परानस्याला।
भेनसमर्थः पारिजातनस्य प्रद्युम्नपाण्डुबाणस्वीरसमुद्रस्य पूर्व इवेति पक्षे समुद्रेनः सुभद्रायाः सो भद्रा।
याः सेनापः पुत्रः अभिमन्युनामा लब्धा तेनलाभेन यद्वा सुभद्रायो अपत्ये उत्पन्नो य भद्रः तादृशो यः से
नानस्य लाभेन शीतरुच वंशस्यान्वयो वंशः उत्पन्नः अन्यत्समाने ५४ कमनीयतया शुभ्रमनेदर्थेन स्व
देहिनो स राजनंदनो रेजे कामदेव इवापरः ॥ स राजनंदनो भरतो रेजे अपरो द्वितीयः कामदेवः।
कंदर्प इव सर्वेषां देहिनां कमनीयतया नंदयमानं दंशुभमलं वर्धयन् पक्षे राजनंदनोऽर्जुनः अपः अ
प्र इति अन्यत्समाने यद्वा कामदेव इवेति काव्यकारयिता कामदेवनामा राजा इवेति सो पि रमणी
यकेन सकलदेहिनामानंदवर्धक इति ५५ इति श्रीराघवपाण्डवीये काव्ये सीताशेषपदीस्वयंव
रो नाम द्वितीयः सर्गः ॥ स राजाभिमतो लोके विजयैर्जितविक्रमः हरिसारविनाभ्येनयाचितो
भूभृद्धौवने ॥ स राजा दशरथो हरिविंहल्लसारथिना मातलिनाभ्येत्यागत्य दिवः स्वर्गस्य वने र
ह्लणे याचितोऽभूत् बभूव स किंभूतः विजयेन शत्रुजयेनोर्जितो महान् विक्रमो यस्य स तथा लोके भि
मतः स्वीकृतैः पक्षे हरिर्वायुः सारथिर्यस्य तेनीतानि तेन वायुपुत्र विजयोर्जुनो दिवः स्वर्गस्य वने खाण्ड
वनास कं याचितो भूद्भूत ह्लणा येत्यर्थः अर्जितो विक्रमो येन लोके राज्ञो युधिष्ठिरस्याभिमतः विजयः

रा॰ पो॰
टी॰
३७
37

स्यात्त्रयेपार्थ इति विग्रहः ॥ इंद्रवंशार्केवाताख्युक्कमीकयमाहिन्नकपोसिद्धेविलोवहरिमाकपिलेविग्रहति
विग्रहः १ कामं दिवं कीर्तिभिरर्जुनोथयनश्रीतवलाद्धविणारथेन रेनरः समाहादिवणांऽवेनचकारभी
तिंधनुषापरेषां ॥ सनरोदशारथ्यः परेषां शत्रूणांभीतिंचकारकृतवान् रथेनदिवंस्वर्गं कामनन्नख
वानः कीर्तिभिरर्जुनोथवलः तन्नीतिमेनसानलिनीतवेनराजनीतवेनवावलान्नगक्षन्नुहरनोयवलः
ननीतवेनमानलिनीतवेनराजनी रिरंधायस्मसनया किंभूतेनधनुषासादाङ्गदिवेन इवगांडिवस
दृशेनेत्यर्थः यद्वानर इवार्जुन इव अर्जुनयथागांडिवधनुषाशत्रुभीतिंचकारेति नयेति अञ्जयेतेह
ष्टांतसिद्धिदर्शनमिति पद्मेसोर्जुनः गांडिवनेधनुषापरेषांभयंचकारकीर्तिभिर्लेहितः कथंभूतेन
रथेनदिवंकामन्नेनाग्निनानीतोवल्यान्हरिर्हनूमान् यत्रतेनसअर्जुनः कइवसाहान्नरयवना
रायणाग्रजइवनेमिवरणपवासिनरइवेत्यर्थः अर्जुनः ककुभंपार्थकोनवीर्यसशुरयोः मनोरके।
हतेपिस्यास्तुलिंनेथवलेपिचेतिमेदिनीकरः सदेवदत्तोदत्तवीर्यसंपदाहीणबाणोज्वलतूणधा
री द्विषद्विजिलीकोयवनंसवाङश्रनापहृपेज्वलनेजहाव सदशारथः स्वस्यबाहोः प्रतापरूपेणोज्व
लनोवङ्गिः नद्विषंनपवद्विजेकासर्पोक्षेपाणुयंवनंसम्हेजहावजहातिस्मकिंभूतोदेवेनइंद्रा
दिनादत्तः अनपवोऽडनावीर्यसंपद्यसनया अहीणेनसमर्थेनवाणेनोजलोयत्नूणंइषुधिन्तङ्गा।
रीयारकः अहीणः सनबाणोज्वलतूणधारीवा पद्मेसोर्जुनः द्विषन् शत्रुर्योद्विजिकः सर्पस्तेनाग्रेव ३७

ने खांडवनामकं ज्वलनेन कृतवान् खांडवं प्रतापनतल्पे देवदत्तेन देवदत्तनाम्ना शंखेन विशेषेणोद्धृतावश
काशितावीर्यसंपद तस्माद्देवानरेंद्रीणवाणान् गुणग्रामलक्ष्मीरिशेषं तले ३ निजविक्रमनि
र्धूतपर्जन्यधारसंततिः मणत्रयोस्त्रार्दं इवश्रावयामास सदानवान् ॥ सदश्रावयः दानवान् स्वराद्धि
षः श्रावयामास विविद्विपे विश्रावयामासेत्यर्थः तासीयगरुडः पत्रगान् स्वर्णान्यथा निजेनविक्रमे
ण निर्धूतो निहिमः पर्जन्य इवमेघ इहेरिविशारसंततिर्दानवश्रेणिनाधारसंततिर्येनसतथा पदे
न्द्रेणो निजविक्रमेण निर्धूतो निहिमः पर्जन्योपयोयावं शारसंततिर्यस्यसतथेति ४ दिवःसकृत्वा
मयशांतिमेवं प्रणीतगुप्तिर्हरिणा कृतश्रीः पुनः प्रपेदे निजमेवराष्ट्रं रामाननालोकनलंपटाक्षि
सदशार्थः निजमात्मीयमेव राष्ट्रं देशं प्रपेदे प्राप्तवान् किंभूतो भामसीयाराम वंश्यानन स्यमुख
स्यालोकने लंपोटस्या भिलाषद्यानमाय स्य सतथा एवंपूर्वोक्तक्रमेण दिवः स्वर्गस्याम यशांति
कृत्वा प्रणीता कृता गुप्तिः रक्षा येन सतथा हरिणा इंद्रेण कृता श्रीः पणीता श्रीर्यस्य सतथा पदे
नार्द्रेनो दिवः स्वर्गात्रिजमेवराष्ट्रं प्रपेदे प्राप रामायाशेपघा श्राननालोकेनलंपटान्सासस्र
